# प्राधानिकं रहस्यम्

राजोवाच ॥
भगवन्नवतारा मे चण्डिकाया स्त्वयोदिताः ।
एतेषां प्रकृतिं ब्रह्मन् प्रधानं वक्तु मर्हसि ॥ १॥

आराध्यं यन्मया देव्याः स्वरूपं येन वै द्विज ।
विधिना ब्रूहि सकलं यथावत्प्रणतस्य मे ॥ २॥

ऋषिरुवाच ॥
इदं रहस्यं परमं अनाख्येयं प्रचक्षते ।
भक्तोऽसीति न मे किञ्चित् तवावाच्यं नराधिप ॥ ३॥

सर्वस्याद्या महालक्ष्मीस् त्रिगुणा परमेश्वरी ।
लक्ष्यालक्ष्य स्वरूपा सा व्याप्य कृत्स्नं व्यवस्थिता ॥ ४॥

मातुलुङ्गं गदां खेटं पानपात्रं च बिभ्रती ।
नागं लिङ्गं च योनिं च बिभ्रती नृप मूर्धनि ॥ ५॥

तप्त काञ्चन वर्णाभा तप्त काञ्चन भूषणा ।
शून्यं तदखिलं स्वेन पूरयामास तेजसा ॥ ६॥

शून्यं तदखिलं लोकं विलोक्य परमेश्वरी ।
बभार परमं रूपं तमसा केवलेन हि ॥ ७॥

सा भिन्नाञ्जन सङ्काशा दंष्ट्राङ्कित वरानना ।
विशाल लोचना नारी बभूव तनु मध्यमा ॥ ८॥

खड्ग पात्र शिरः खेटैर् अलङ्कृत चतुर्भुजा ॥
कबन्धहारं शिरसा बिभ्राणाहि शिरः स्रजम् ॥ ९॥

सा प्रोवाच महालक्ष्मीं तामसी प्रमदोत्तमा ।
नाम कर्म च मे मातर् देहि तुभ्यं नमो नमः ॥ १०॥

तां प्रोवाच महालक्ष्मीस् तामसीं प्रमदोत्तमाम् ।
ददामि तव नामानि यानि कर्माणि तानि ते ॥ ११॥

महामाया महाकाली महामारी क्षुधा तृषा ।
निद्रा तृष्णा चैकवीरा कालरात्रि र्दुरत्यया ॥ १२॥

इमानि तव नामानि प्रतिपाद्यानि कर्मभिः ।
एभिः कर्माणि ते ज्ञात्वा योऽधीते सोऽश्नुते सुखम् ॥ १३॥

तामित्युक्त्वा महालक्ष्मीः स्वरूप मपरं नृप ।
सत्त्वाख्ये नातिशुद्धेन गुणेनेंदु प्रभं दधौ ॥ १४॥

अक्षमालाङ्कुश धरा वीणा पुस्तक धारिणी ।
सा बभूव वरा नारी नामान्यस्यै च सा ददौ ॥ १५॥

महाविद्या महावाणी भारती वाक् सरस्वती ।
आर्या ब्राह्मी कामधेनुर् वेदगर्भा च धीश्वरी ॥ १६॥

अथोवाच महालक्ष्मीर् महाकालीं सरस्वतीम् ॥
युवां जनयतां देव्यौ मिथुने स्वानुरूपतः ॥ १७॥

इत्युक्त्वा ते महालक्ष्मीः ससर्ज मिथुनं स्वयम् ।
हिरण्यगर्भौ रुचिरौ स्त्रीपुंसौ कमलासनौ ॥ १८॥

ब्रह्मन्विधे विरिञ्चेति धातरित्याह तं नरम् ॥
श्रीः पद्मे कमले लक्ष्मीत्याह माता च ताम् स्त्रियं ॥ १९॥

महाकाली भारती च मिथुने सृजतः सह ।
एतयोरपि रूपाणि नामानि च वदामि ते ॥ २०॥

नीलकण्ठं रक्तबाहु श्वेताङ्गं चंद्रशेखरम् ।
जनयामास पुरुषं महाकाली सितां स्त्रियम् ॥ २१॥

स रुद्रः शङ्करः स्थाणुः कपर्दी च त्रिलोचनः ।
त्रयीविद्या कामधेनुः सा स्त्री भाषाक्षरा स्वरा ॥ २२॥

सरस्वती स्त्रियं गौरीं कृष्णं च पुरुषं नृप ।
जनयामास नामानि तयोरपि वदामि ते ॥ २३॥

विष्णुः कृष्णो हृषीकेशो वासुदेवो जनार्दनः ।
उमा गौरी सती चण्डी सुन्दरी सुभगा शिवा ॥ २४॥

एवं युवतयः सद्यः पुरुषत्वं प्रपेदिरे ।

चक्षुष्मन्तो नु पश्यन्ति नेतरे तद्विदो जनाः ॥ २५॥

ब्रह्मणे प्रददौ पत्नीं महालक्ष्मी नृंप त्रयीम् ।
रुद्राय गौरीं वरदां वासुदेवाय च श्रियम् ॥ २६॥

स्वरया सह सम्भूय विरञ्चोऽण्ड मजीजनत् ।
बिभेद भगवान् रुद्रस् तद्गौर्या सह वीर्यवान् ॥ २७॥

अण्डमध्ये प्रधानादि कार्यजात मभून्नृप ।
महाभूतात्मकं सर्वं जगत्स्थावर जङ्गमम् ॥ २८॥

पुपोष पालयामास तल्लक्ष्म्या सह केशवः ।
संजहार जगत्सर्वं सह गौर्या महेश्वरः ॥ २९॥

महालक्ष्मी र्महाराज सर्वसत्त्व मयीश्वरी ।
निराकारा च साकारा सैव नानाभिधान भृत् ॥ ३०॥

नामांतरै र्निरूप्यैषा नाम्ना नान्येन केनचित् ॥ ३१॥

इति श्रीप्राधानिक रहस्यं सम्पूर्णम् ॥